दिनांक 14-9-20

उपशास्त्री प्रथमवर्ष, विषय व्याकरण

ग्रन्थ- सिद्धान्त कौमुदी : तद्धितप्रकरणम्

1 क्षत्रियः — क्षत्र शब्दात् क्षत्राद् घः इति सूत्रेण घ प्रत्यये, आयनेयीनीयियः इति सूत्रेण घकारस्य स्थाने इय् आदेशे कृते। क्षत्रिय इति जाते। प्रातिपदिक संज्ञायाम् विभक्ति कार्ये।

2 रैवतिकः — रेवती शब्दात् अपत्यार्थे रेवत्यादिभ्यः ठक्. इति सूत्रेण ठक् प्रत्यये ठस्येकः इति सूत्रेण ठस्य स्थाने इक् आदेशे, किति च इति वृद्धौ। प्रातिपदिक संज्ञायां विभक्ति कार्ये।

3 पाञ्चालः — पञ्चालानां देशविशेषाणां राजा इति विग्रहे जनपद शब्दात् क्षत्रियाद् अञ् इति सूत्रेण अञ्, क्षत्रिय समान शब्दात् जनपदात् तस्य राजनि अपत्यवत् इति वार्तिकेन अण् प्रत्यये अनुबन्ध लोपे। तद्धितेष्वचामादेः इति वृद्धौ प्रातिपदिक संज्ञायाम् विभक्ति कार्ये।

4 पौरवः — पुरूणां राजा इति विग्रहे पुरु शब्दात् पुरोरण् वक्तव्यः इति वार्तिकेन अण् प्रत्यये अनुबन्ध लोपे। तद्धितेष्वचामादेः इति वृद्धौ उकारस्य स्थाने गुणे अवादेशे। प्रातिपदिक संज्ञायां विभक्ति कार्ये।

5 पाण्ड्यः — पाण्डोरपत्यम् इति विग्रहे पाण्डोः ड्यण् इति वार्तिकेन ड्यण् प्रत्यये अनुबन्ध लोपे टि लोपे च तद्धितेष्वचामादेः इति वृद्धौ, प्रातिपदिक संज्ञायाम् विभक्ति कार्ये।

6 कौरव्यः — कुरूणां जनपदविशेषाणां क्षत्रियविशेषाणां वा राजा इति विग्रहे कुरुनादिभ्यो ण्यः इति सूत्रेण ण्य प्रत्यये अनुबन्ध लोपे। तद्धितेष्वचामादेः इति वृद्धौ ओर्गुणः इति गुणे अवादेशे। प्रातिपदिक संज्ञायाम् विभक्ति कार्ये।

अमरनाथ मिश्र
एसो० प्रो० व्याकरण
रा० उ० सं० म० वि०

(दिनांक 14-1-20)

उपशास्त्री द्वितीय वर्ष, विषय - व्याकरण
ग्रन्थ - सिद्धान्तकौमुदी अदादि प्रकरणम्।

1 अधुक्षत् - दुह् धातोः लुङ्, लुङ् स्थाने तिप्तस्झि इति सूत्रेण त प्रत्यये, अनुबन्ध लोपे, इतश्च इति इकार लोपे, लुङ्लङ्लृङ्क्ष्वडुदात्तः इति अडागमे। अदुह् त इति दशायां दादेर्धातोर्घः इति सूत्रेण हकारस्य स्थाने घकारादेशे; एकाचो बशो भष् झषन्तस्य स्ध्वोः इति भषा भाव अधुघ् त इति जाते ~~शल इगुपधादनिटः क्सः~~ च्लि लुङि इति सूत्रेण च्लि प्रत्यये, शल इगुपधादनिटः क्सः इति सूत्रेण च्लेः स्थाने क्सादेशे अनुबन्ध लोपे। घकारस्य स्थाने जश्त्वे चर्त्वे ककार षकार योगे अधुक्षत् इति सिद्धम्।

2 अदुग्ध - ~~दुह्~~ दुह् धातोर्लुङ्, लुङ् स्थाने तिप्तस्झि इति सूत्रेण त प्रत्यये। लुङ्लङ्लृङ्क्ष्वडुदात्तः इति अडागमे अनुबन्ध लोपे। च्लि लुङि इति सूत्रेण च्लि प्रत्यये, ~~लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये इति सूत्र~~ शल इगुपधादनिटः क्स इति सूत्रेण ~~क्स प्रत्यये~~ च्लेः स्थाने क्स आदेशे लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये इति सूत्रेण क्स लोपे। दादेर्धातोर्घः इति सूत्रेण हकारस्य स्थाने घकारादेशे, झषस्तथोर्धोऽधः इति सूत्रेण तकारस्य स्थाने धकारादेशे घकारस्य स्थाने जश्त्वे ~~चर्त्वे~~ अदुग्ध इति सिद्धम्।

3 आह - ब्रू धातोः लट्, लट् स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्ध लोपे। सार्वधातुक संज्ञायां, शप् प्रत्यये, अदिप्रभृतिभ्यः शपः इति शपो लुकि। ब्रुवीति इति दशायां ब्रुवः पञ्चानामादित आहो ब्रुवः इति सूत्रेण तिप् स्थाने णल् तथा ब्रू स्थाने वा आह आदेशौ स्तः; आह इति सिद्धम्।

अमरनाथ मिश्र
ए.सो.प्रो. व्याकरण
श्री उ. सं. म. वि. ~~सुल~~
सुलतानपुर

दिनांक 14-9-20

शास्त्री प्रथम खण्ड - विषय - अनि० दर्शन
ग्रन्थ - तर्कसंग्रह - न्यायपदार्थकोषः

1 अन्वयव्यतिरेकि – (लिङ्गविशेषः) अन्वयेन व्यतिरेकेण च व्याप्तिमत्, यथा वह्नौ साध्ये धूमवत्त्वम्।

2 अन्वयव्याप्तिः – तत्सत्त्वे तत्सत्त्वम्। यत्र धूमस्तत्राऽग्निः यथा – महानसम् इति अन्वयव्याप्तिः साध्यसाधनयोः साहचर्यम् अन्वयः।

3 अपक्षेपणम् – (कर्मविशेषः) अपरव्यवहाराऽसाधारणकारणम्। तद्विधम् – समीपस्थे दिक्कृतम् अपरत्वम्। कनिष्ठे कालकृतम् अपरत्वम्।

4 अपरत्वम् – (गुणविशेषः) अपरव्यवहाराऽसाधारणकारणम्। तद्द्विविधम् – समीपस्थे दिक्कृतम् अपरत्वम्। कनिष्ठे कालकृतम् अपरत्वम्।

5 अपरसामान्यम् (जातिविशेषः) न्यूनदेशवृत्तित्वम्। अर्थात् न्यूनदेशे स्थापितः जातिः।

6 अपानः (वायुविशेषः) जलादेरधः प्रकाशको वायुः। अर्थात् प्रतियोगी ज्ञानाधीनः ज्ञानम्।

7 अभावः – प्रतियोगिज्ञानाधीनज्ञानविषयः

8 अयथार्थः – अप्रमाजन्यस्मृतिः अयथार्था। अयथार्थज्ञानात् उत्पन्न ज्ञानम्।

9 अयथार्थोऽनुभवः – (बुद्धिभेदः) तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः। यथा शुक्तौ रजतम्।

10 अयुतसिद्धौ – ययोर्द्वयोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ। यथा – अवयवावयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्ती, विशेषनित्यद्रव्ये चेति

11 अवयवत्वम् – प्रतिज्ञाद्यन्यतमत्वम्।

अमरनाथ मिश्र
एसो० प्रो० व्याकरण
रा० उ० सं० म० वि०
सुखसेना पूर्णिया